संस्कृतप्रचारपुस्तकमाला सं. २३

ललित-मङ्गलम्

[वन्दना, प्रार्थना तथा मङ्गलाचरण के रूप में पढ़ने योग्य कतिपय विभिन्न छन्दों की सरस-ललित कविताओं का मनोहर लघु-संकलन]

सार्वभौम संस्कृत प्रचार कार्यालय
वा रा ण सी

यह ग्रन्थ नीचे निर्देशित तिथि के पूर्व अथवा उक्त थि तक वापस कर दें। विलम्ब से लौटाने पर प्रतिदिन दस पैसे विलम्ब शुल्क देना होगा।

संस्कृतप्रचारपुस्तकमाला सं. २३

ललित-मङ्गलम्

[वन्दना, प्रार्थना तथा मङ्गलाचरण के रूप में पढ़ने योग्य कतिपय विभिन्न छन्दों की सरस-ललित कविताओं का मनोहर लघु संकलन]

सङ्कलयिता
वासुदेव द्विवेदी शास्त्री
[सम्पादक—संस्कृतप्रचारपुस्तकमाला]

सार्वभौम संस्कृत प्रचार कार्यालय
वा रा ण सी

प्रकाशक—
सार्वभौम संस्कृत प्रचार कार्यालय
डी० ३८।११० हौजकटोरा,
वाराणसी

★

संस्करण — द्वितीय
संख्या — एक हजार
मूल्य — एक रुपया

★

मुद्रक :
बैजनाथ प्रसाद
कल्पना प्रेस, रामकटोरा रोड,
वाराणसी।

विनम्र निवेदन

संस्कृत की कवितायें पदों के लालित्य, छन्दों की विविधता एवं गेयता तथा यमक-अनुप्रासों की योजना के कारण संसार के काव्यसाहित्य में अद्वितीय हैं। इन तीनों गुणों में यदि एक-एक भी गुण हो तो संस्कृत की कविता विशेष आनन्ददायिनी होती है फिर यदि इन तीनों गुणों का एकत्र मिलन हो जाय तो उसकी मनोहरता के सम्बन्ध में क्या कहना!

बहुत दिनों से मेरी यह इच्छा थी कि संस्कृत की ऐसी ही कविताओं का एक संग्रह प्रकाशित किया जाय जिन में भावसौष्ठव के साथ उपर्युक्त गुणों का भी सुन्दर समन्वय हो। तदनुसार ही इस पुस्तक का सम्पादन तथा प्रकाशन कुछ वर्ष पूर्व किया गया था जिसका कुछ परिवर्धन के साथ आज पुनः प्रकाशन किया जा रहा है।

इस पुस्तक के प्रथम संस्करण में श्लोकों का संग्रह देवताओं के अनुसार किया गया था पर इस संस्करण में छन्दों के अनुसार किया गया है। अर्थात् प्रथम संस्करण देवप्रधान था तो यह संस्करण छन्दप्रधान हो गया है।

इस परिवर्तन का उद्देश्य संस्कृत के विद्यार्थियों, प्रेमियों और सर्वसाधारण संगीतज्ञों को देववन्दना के साथ संस्कृत के छन्दों का ज्ञान कराना तथा उन्हें श्लोकों को सुन्दर स्वर में, और यदि संभव हो तो हल्के संगीत के पुट के साथ, पढ़ने का अभ्यास कर स्वयं आनन्द प्राप्त करने तथा दूसरों को भी आनन्दित करने की ओर प्रेरित करना है। क्योंकि जब कोई पाठक या गायक किसी एक छन्द के अनेक श्लोकों को एक साथ पढ़ता है तो उसे स्वरसाधना में सरलता होती है और अपनी पाठशैली में एकरूपता लाने में भी सहायता मिलती है।

इस प्रकार की ललित कविताओं के वृहत् संग्रह के श्रीगणेश अथवा मङ्गलाचरण के रूप में यह लघु पुस्तिका प्रकाशित की जा रही है। संस्कृत के छात्र, संगीतप्रेमी सज्जन तथा भक्तगण इन कविताओं को पढ़-पढ़ कर, गा-गा कर तथा सुना सुना कर आनन्द एवं भक्तिलाभ के साथ संस्कृत के प्रचार में भी सहायक हों यही सबसे विनम्र निवेदन है।

पौष अमावास्या २०३३ वि०
२१।१।१९७६ ई०

विनीत
सङ्कलयिता

Name - Ajay Kumar Jha
Village + Post - Malahi (Sursand) (Sitamrhi)

ललित-मङ्गलम्

अनुष्टुप्*

श्रीकृष्णस्तुतिः

इन्दीवर-दल-श्यामम् इन्दिरानन्द-कन्दलम् ।
वन्दारु-जन-मन्दारं वन्देऽहं यदुनन्दनम् ।।

पुष्टिमार्गीय-स्तोत्र-रत्नाकरः

श्रीरामस्तुतिः

वन्दामहे महेशान--चण्ड-कोदण्ड-खण्डनम् ।
जानकी-हृदयानन्द--चन्दनं रघुनन्दनम् ।।

सुभाषितग्रन्थः

श्रीशिवस्तुतिः

नमस्तुङ्ग-शिरश्चुम्बि--चन्द्र-चामर-चारवे ।
त्रैलोक्य-नगराऽऽरम्भ-मूल-स्तम्भाय-शम्भवे ।।

हर्षचरितम्

---

* इस छन्द के प्रत्येक चरण में ८ अक्षर होते हैं ।

श्रीदुर्गास्तुतिः

भ्रमरी-कबरी-भार — भ्रमरी-मुखरीकृतम् ।
दूरीकरोतु दुरितं गौरी-चरणपङ्कजम् ।।

कुवलयानन्दः

श्रीसरस्वतीस्तुतिः

शारदा शारदाम्भोज--वदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ।।

तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ।
यत्प्रसादात् प्रलीयन्ते मोहान्धतमसश्छटाः ।।

सुभाषितग्रन्थः

श्रीविष्णुस्तुतिः

यदुवंशावतंसाय वृन्दावन--विहारिणे ।
संसार-सागरोत्तार--तरये हरये नमः ।।

पद्यावली

श्रीगङ्गास्तुतिः

गाङ्गं वारि मनोहारि मुरारि-चरण-च्युतम् ।
त्रिपुरारि-शिरश्चारि पापहारि पुनातु माम् ।।

गङ्गाष्टकम्

आर्या*

श्रीकृष्णस्तुतिः

गुण-गण-पारावारं
सारं रमणीयतावतां जगति ।
हारं मधुर-विहारं
वपुरनुवारं मनः स्मरतात् ॥

श्रीकृष्णविरुदावलिः

कामादपि कमनीये
नमनीये ब्रह्म-रुद्राद्यैः ।
निःसाधन-भजनीये
भावतनौ मे मतिर्भूयात् ॥

अवलोकितमनुमोदित-
मालिङ्गितमङ्गनाभिरभिरामैः ।
अधिवृन्दावन-कुञ्जं
मरकतपुञ्जं नमस्यामः ॥

---

* इस छन्द के प्रथम तथा तृतीय चरण में १२ मात्रायें दूसरे चरण में १८ मात्रायें तथा चतुर्थ चरण में १५ मात्रायें, होती हैं ।

अलकावृत-लसदलिके
विरचित-कस्तूरिका-तिलके ।
चपल-यशोदा-बाले
शोभित-भाले मतिर्मेऽस्तु ॥

नवनीतप्रियाष्टकम्

दिव्य-धुनी-मकरन्दे
परिमल-परिभोग-सच्चिदानन्दे ।
श्रीपति-पदारविन्दे
भव-भय-खेद-च्छिदे वन्दे ॥

षट्पदीस्तोत्रम्

श्रीहनुमत्स्तुतिः

तरुणाऽरुण-मुखकमलं
करुणारस-पूर-पूरिताऽपाङ्गम् ।
संजीवनमाशासे
मञ्जुलमहिमानमञ्जनाभाग्यम् ॥

श्रीसरस्वतीस्तुतिः

ओङ्कार-पञ्जर-शुकीम्
उपनिषदुद्यान-केलि-कलकण्ठीम् ।

आगम–विपिन–मयूरीम्
आर्यामन्तर्विभावये गौरीम् ।।

दयमान-दीर्घ-नयनां
देशिकरूपेण दर्शिताऽभ्युदयाम् ।
वाम-कुच-निहित-वीणां
वरदां संगीतमातृकां वन्दे ।।

श्यामलिम-सौकुमार्यां
सौन्दर्याऽऽनन्द-सम्पदुन्मेषाम् ।
तरुणिम-करुणापूरां
मद-जल-कल्लोल-लोचनां वन्दे ।।

सरिगमपधनि-रतान्तां
वीणा-सङ्क्रान्त-कान्तहस्तान्ताम् ।
शान्तां मृदुल-स्वान्तां
कुच-भर-तान्तां नमामि शिवकान्ताम् ।।

नवरत्नस्तोत्रम्

वियोगिनी*

श्रीदुर्गास्तुतिः

जगदम्ब ! विचित्रमत्र किं
परिपूर्णा करुणास्ति चेन्मयि ।
अपराध–परम्परा–वृतं
नहि माता समुपेक्षते सुतम् ॥

अपराधक्षमापनस्तोत्रम्

न धनं न जनं न सुन्दरीं
कवितां वा जगदीश कामये ।
मम जन्मनि जन्मनीश्वरे
भवताद् भक्तिरहैतुकी त्वयि ॥

श्रीकृष्णस्तुतिः

अयि नन्दतनूज किङ्करं
पतितं मां विषमे भवाम्बुधौ ।
कृपया तव पादपङ्कज-
स्थित–धूली–सदृशं विचिन्तय ॥

शिक्षाष्टकम्

---

* इस छंद के प्रथम तथा तृतीय चरण में १० तथा द्वितीय एवं चतुर्थ चरण में ११ अक्षर होते हैं । लक्षण—विषमे ससजा गुरुः समे सभरा लोऽथ गुरुर्वियोगिनी ।

इन्द्रवज्रा*

श्रीकृष्णस्तुतिः

रागान्ध-गोपीजन-वन्दिताभ्यां
योगीन्द्र-भृङ्गेन्द्र-निवेशिताभ्याम् ।
आताम्र-पङ्केरुह-विभ्रमाभ्यां
स्वामिन् ! पदाभ्यामयमञ्जलिस्ते ॥

श्रीकृष्णकर्णामृतम्

श्रीशिवस्तुतिः

सानन्दमानन्दवने वसन्तम्
आनन्दकन्दं हतपापवृन्दम् ।
वाराणसीनाथमनाथनाथं
श्रीविश्वनाथं शरणं प्रपद्ये ॥

श्रीसरस्वतीस्तुतिः

आशासु राशीभवदङ्गवल्ली-
भासैव दासीकृत-दुग्ध-सिन्धुम् ।
मन्दस्मितैर्निन्दित-शारदेन्दुं
वन्देऽरविन्दासन-सुन्दरि ! त्वाम् ॥

---

* इस छन्द के प्रत्येक चरण में ११ अक्षर होते हैं तथा विराम ५-६ पर होता है। लक्षण—स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

उपेन्द्रवज्रा*

श्रीकृष्णस्तुतिः

नगोपलीलोऽपि हि गोपलीलः
कलापकेशोऽप्यकलाप-केशः ।
वने विहारोऽप्यवने विहारः
स पातु गोपीजन-वल्लभो वः ॥

उपजाति❋

श्रीकृष्णस्तुतिः

ब्रह्मालवालं भुवनैक-पालं
यशोविशालं शिशुपाल-कालम् ।
संसार-माया-मति-मोह-जालं
बालं मुकुन्दं शिरसा नमामि ॥

बालमुकुन्दाष्टकम्

---

* इस छन्द के प्रत्येक चरण में ११ अक्षर होते हैं तथा विराम ५-६ पर होता है । लक्षण —उपेन्द्रवज्रा प्रथमे लघौ सा ।

❋ इस छन्द के प्रत्येक चरण में ११ अक्षर होते हैं ।

किरीट-केयूर-विभूषिताय
ग्रैवेय-माला-मणि-रञ्जिताय ।
स्फुरच्चलत्-काञ्चन-कुण्डलाय
नमोऽस्तु गोपीजनवल्लभाय ॥

गोपीजनवल्लभाष्टकम्

नवाम्बुदाऽनीक-मनोहराय
प्रफुल्ल-राजीव-विलोचनाय ।
वेणुस्वनैर् मोदित-गोकुलाय
नमोऽस्तु गोपी-जन-वल्लभाय ॥

गोपीजनवल्लभाष्टकम्

वृन्दारका यस्य भवन्ति भृङ्गा
मन्दाकिनी यन्मकरन्द-बिन्दुः ।
तवारविन्दाक्ष पदारविन्दं
वन्दे चतुर्वर्ग-चतुष्पदं तत् ॥

मल्लिनाथः

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम् ।

वटस्य पत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि ॥

बालमुकुन्दाष्टकम्

सरस्वतीस्तुतिः

कस्तूरिका-बिन्दु-विराजि-भालाम्
करे दधानां स्फटिकाक्षमालाम् ।
ओष्ठ-प्रभा-निर्जित-सत्प्रवालाम्
त्वां नौमि नित्यं शिरसाऽऽदिबालाम् ॥

हरिवंशकविः

शिव-पार्वतीस्तुतिः

मन्दार–माला–लुलितालकायै
कपाल–मालाङ्कित–शेखराय ।
दिव्याम्बरायै च दिगम्बराय
नमः शिवायै च नमः शिवाय ॥

कामचारिणी*

गोपिकागीतम्

जयति तेऽधिकं जन्मना व्रजः

श्रयत इन्दिरा शश्वदत्र हि ।

दयित दृश्यतां दिक्षु तावका-

स्त्वयि धृतासवस्त्वां विचिन्वते ॥

मधुरया गिरा वल्गुवाक्यया

बुध-मनोज्ञया पुष्करेक्षण ।

विधिकरीरिमा वीर मुह्यती-

रधर-सीधुनाऽऽप्याययस्व नः ॥

तव कथामृतं तप्तजीवनं

कविभिरीडितं कल्मषापहम् ।

श्रवण-मङ्गलं श्रीमदाततं

भुवि गृणन्ति ते भूरिदा जनाः ॥

—श्रीमद्भागवतम्

---

* इस छन्द के प्रत्येक चरण में ११ अक्षर होते हैं तथा विराम ६-५ पर होता है । लक्षण है—नरदलाश्च गः कामचारिणी ।

शिशुलीला*

श्रीकृष्णस्तुतिः

अतसी-कुसुमोपमेय-कान्तिर्
यमुना-कूल-कदम्ब-मध्य-वर्ती,
नव-गोप-वधू विलास-शाली
वनमाली वितनोतु मङ्गलं नः ।।

सरस्वतीस्तुतिः

शरणं करवाणि शर्मदं ते
चरणं वाणि ! चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः
कुरु मामम्ब ! कृतार्थ-सार्थवाहम् ।।

मल्लिनाथः

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम् ।

* इस छन्द के प्रथम तथा तृतीय चरण में ११ तथा द्वितीय एवं चतुर्थ चरण में १२ अक्षर होते हैं। लक्षण—प्रथमे ससजा गयुग्मयुक्ता शिशुलीला चरमे सभौ रजौ चेत् ।

अवधीरित-शारदाऽरविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ।।

मुकुन्दमालास्तोत्रम्

अनुशीलित-कुंजवाटिकायाम्
जघनालम्बित-पीत-शाटिकायाम् ।
मुरली-कल-कूजिते रतायां
मम चेतोऽस्तु कदम्बदेवतायाम् ।

पद्यावली

अमरी-मुख-सीधु-माधुरीणां
लहरी काचन चातुरी कलानाम् ।
तरलीकुरुते मनो मदीयं
मुरलीनाद-परम्परा मुरारेः ।।

पद्यावली

रथोद्धता*

श्रीकृष्णस्तुतिः

क्षीर-सागर-तरङ्ग-शीकराऽऽ
सार-तारकित-चारु-मूर्तये ।
भोगि-भोग-शयनीय-शायिने
माधवाय मधु-विद्विषे नमः ॥

मुकुन्दमाला

नन्दनन्दन-पदारविन्दयोः
स्यन्दमान-मकरन्द-विन्दवः ।
सिन्धवः परम-सौख्य-सम्पदां
नन्दयन्तु हृदयं ममाऽनिशम् ॥

पद्यावली

श्रीगणेशस्तुतिः

अन्तराय-तिमिरोपशान्तये
शान्तपावनमचिन्त्यवैभवम् ।
तन्नरं वपुषि कुञ्जरं मुखे
मन्महे किमपि तुन्दिलं महः ॥

मल्लिनाथः

---

* इस छन्द के प्रत्येक चरण में ११ अक्षर होते हैं । लक्षण-रात् परैर्नरलगै रथोद्धता ।

कर्ण-लम्बित-कदम्ब-मञ्जरी-
केशराऽरुण-कपोल-मण्डलम् ।
निर्मलं निगम-वागगोचरं
नीलिमानमवलोकयामहे ॥

श्रीकृष्णकर्णामृतम्

श्रीहनूमत्स्तुतिः

आञ्जनेयमतिपाटलाननं
काञ्चनाद्रि-कमनीय-विग्रहम् ।
पारिजाततरु-मूलवासिनं
भावयामि पवमान-नन्दनम् ॥

यत्र यत्र रघुनाथ-कीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
वाष्पवारि-परिपूर्ण-लोचनं
मारुतिं नमत राक्षसान्तकम् ।

वाल्मीकिरामायणम्

श्रीशिवस्तुतिः

इन्दुमौलिमिह कुन्द-सुन्दरं
सुन्दरी-कलित-वामदेहकम् ।

इन्दिरावन-मिलिन्द-वन्दितं
नौमि चन्दिर-ललाट-लालसम् ॥

ईश्वरशतकम्

★

शालिनी*

श्रीकृष्णस्तुतिः

पुञ्जीभूतं प्रेम गोपाङ्गनानां
मूर्तीभूतं भागधेयं यदूनाम् ।
एकीभूतं गुप्तवित्तं श्रुतीनां
श्यामीभूतं ब्रह्म मे सन्निधत्ताम् ॥

श्रीरामस्तुतिः

माता रामो मत्पिता रामचन्द्रः
स्वामी रामो मत्सखा रामचन्द्रः ।
सर्वस्वं मे रामचन्द्रो दयालुः
नान्यं जाने नैव जाने न जाने ॥

श्रीरामरक्षास्त्रोत्रम्

---

* इस छन्द के प्रत्येक चरण में ११ अक्षर होते हैं तथा विराम ४-७ पर होता है। लक्षण—मत्तौ गौ चेत् शालिनी वेदलोकैः ।

स्वागता*

श्रीकृष्णस्तुतिः

शातकुम्भ–रुचि-हारि–दुकूलः
केकिचन्द्रक–विराजित–चूलः ।
नव्य–यौवन–लसद्–व्रजनारी–
रञ्जनो जयति कुञ्जविहारी ॥

राग-मण्डल–विभूषित–वंशी—
विभ्रमेण मदनोत्सव-शंसी ।
स्तूयमान–चरितः शुक–सारी-
श्रेणिभिर्जयति कुञ्जविहारी ॥

गौर-धातु-तिलकोज्ज्वल-भालः
केलि-चञ्चलित–चम्पकमालः ।
अद्रि–कन्दरगृहेष्वभिसारी
सुभ्रुवां जयति कुञ्जविहारी ॥

कुञ्जविहार्यष्टकम्

---

* इस छन्द के प्रत्येक चरण में ११ अक्षर होते हैं। लक्षण-स्वागता रनभगै गुरुणा च ।

वंशस्थम्*

श्रीशिवस्तुतिः

जयन्ति बाणासुर-मौलि-लालिता
दशास्य-चूडामणि-चक्र-चुम्बिनः ।
सुरासुराधीश-शिखान्त-शायिनस्
तमश्छिदस्त्र्यम्बक-पाद-पांसवः ॥

कादम्बरी

श्रीरामस्तुतिः

प्रसन्नतां या न गताऽभिषेकतस्
तथा न मम्लौ वनवास-दुःखतः ।
मुखाम्बुजश्री रघुनन्दनस्य मे
सदाऽस्तु सा मञ्जुल-मङ्गल-प्रदा ॥

तुलसीकृतरामायणम्

अणीयसे विश्वविधारिणे नमो
नमोऽन्तिकस्थाय दवीयसे नमः ।
अतीत्य वाचां मनसां च गोचरं
स्थिताय ते तत्पतये नमो नमः ॥

किरातार्जुनीयम्

* इस छन्द के प्रत्येक चरण में १२ अक्षर होते हैं। तथा विराम ५-७ पर होता है। लक्षण—जतौ तु वंशस्थमुदीरितं जरौ।

स्त्रग्विणी*

अच्युतं केशवं रामनारायणं
कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिका - वल्लभं
जानकी-नायकं रामचन्द्रं भजे ।।

अच्युतं केशवं सत्यभामा-धवं
माधवं श्रीधरं राधिका—राधितम् ।
इन्दिरा - मन्दरं चेतसा सुन्दरं
देवकीनन्दनं नन्दजं सन्दधे ।।

विष्णवे जिष्णवे शङ्खिने चक्रिणे
रुक्मिणी—रागिणे जानकी-जानये ।
वल्लवी-वल्लभायार्चितायात्मने
कंसविध्वंसिने वंशिने ते नमः ।।

अच्युताष्टकम्

राजते श्रीमती देवता भारती
शारदेन्दु - प्रभा - विभ्रमं बिभ्रती ।
मञ्जु - मञ्जीर - झङ्कार - संचारिणी
तार - मुक्तालता-हार-शृङ्गारिणी ।।

भारतीस्तवनम

---

* इस छन्द के प्रत्येक चरण में १२ अक्षर होते हैं । लक्षण—
रैश्चतुर्भिर्युता स्त्रग्विणी संमता ।

तोटकम्*

चिकुरं बहुलं विरलं भ्रमरं
मृदुलं वचनं विपुलं नयनम् ।
अधरं मधुरं वदनं ललितं
चपलं चरितं नु कदाऽनुभवे ॥

श्रीकृष्णकर्णामृतम्

अधरं मधुरं वदनं मधुरं
नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥

वचनं मधुरं चरितं मधुरं
वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ॥

मधुराष्टकम्

---

* इस छन्द के प्रत्येक चरण में १२ अक्षर होते हैं । लक्षण–
ननु तोटकमांब्धसकारयुतम् ।

भुजङ्गप्रयातम्*

श्रीहरिस्तुतिः

जगज्जाल-पालं कचत्-कण्ठ-मालं
शरच्चन्द्र-भालं महादैत्य-कालम् ।
नभो-नील–कायं दुरावार-मायं
सुपद्मा-सहायं भजेऽहं भजेऽहम् ॥

हरिस्तोत्रम्

श्रीशिवस्तुतिः

गले रुण्डमालं तनौ सर्पजालं
महाकाल-कालं गणेशाधिपालम् ।
जटाजूट-भङ्गोत्तरङ्गैर्विशालं
शिवं शङ्करं शम्भुमीशानमीडे ॥

शिवाष्टकम्

---

* इस छन्द के प्रत्येक चरण में १२ अक्षर होते है तथा ६–६ पर विराम होता है लक्षण— भुजङ्गप्रयातं भवेद् यैश्चतुर्भिः ।

श्रीगणेशस्तुतिः

यतोऽनन्तशक्ते-रनन्ताश्च जीवा
यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ।।

पुष्पिताग्रा*

त्रिभुवन-भुवनाभिराम-कोशं
सकल-कलङ्कहरं परं प्रकाशम् ।
अशरण-शरणं शरण्यमीशं
हरिमजमीश्वरमच्युतं प्रपद्ये ।।

कुवलय-दल-नील-सन्निकाशं
शरदमलाम्बर-कोटरोपमानम् ।

* इस छन्द के प्रथम तथा तृतीय चरण में १२ तथा द्वितीय एवं चतुर्थ चरण में १३ अक्षर होते हैं । लक्षण—अयुजि नयुगरेफतो यकारो, युजि तु नजौ जरगाश्च पुष्पिताग्रा ।

भ्रमर-तिमिर कज्जलाञ्जनाभं
सरसिज-चक्र-गदाधरं प्रपद्ये ॥

योगवाशिष्ठम्

श्रीलक्ष्मीस्तुतिः

सरसिज-निलये सरोजहस्ते
धवलतरांशुक-गन्ध-माल्य-शोभे ।
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवन-भूतिकरि प्रसीद मह्यम् ॥

श्रीसूक्तम्

अगणितगुणमप्रमेयमाद्यं
सकल-जगत्स्थिति-संयमादि-हेतुम् ।
उपरम-परमं परात्म-भूतं
सततमहं प्रणतोऽस्मि रामचन्द्रम् ॥

त्रिभुवन-कमनीय-रूपमीड्यं
रवि-शत-भासुरमीहित-प्रदानम् ।
शरणदमनिशं सुरागमूले
कृतनिलयं रघुनन्दनं प्रपद्ये ॥

पर-धन-पर-दार-वर्जितानां
पर-गुण-भूति-सुतुष्ट-मानसानाम् ।
पर-हित-निरतात्मनां सुसेव्यं
रघुवरमम्बुज-लोचनं प्रपद्ये ।।

अध्यात्मरामायणम्

द्रुतविलम्बितम्*

श्रीकृष्णस्तुतिः

अधर-बिम्ब-विडम्बित-विद्रुमं
मधुर-वेणु-निनाद-विनोदितम् ।
कमल-कोमल-कम्र-मुखाम्बुजं
कमपि गोपकुमारमुपास्महे ।।

मदशिखण्डि-शिखण्ड-विभूषणं
मदन-मन्थर-मुग्ध-मुखाम्बुजम् ।
व्रजवधू-नयनाञ्चल-वञ्चितं
विजयतां मम वाङ्मय-जीवितम् ।।

श्रीकृष्णकर्णामृतम्

---

* इस छन्द के प्रत्येक चरण में १२ अक्षर होते हैं । लक्षण: "द्रुतविलम्बितमाह न भौ भरौ" ।

सकल-मङ्गल-वृद्धि-विधायिनी
सकल-सद्गुण-सन्तति-दायिनी ।
सकल-मञ्जुल-सौख्य-विकाशिनी
हरतु मे दुरितानि सरस्वती ॥

श्रीसरस्वतीस्तवः

मञ्जुभाषिणी*

श्रीकृष्णस्तुतिः

अरुणाधराऽमृत-विशेषित-स्मितं
वरुणालयानुगत-वर्ण-वैभवम् ।
तरुणारविन्द-दल-दीर्घ-लोचनं
करुणामयं कमपि बालमाश्रये ॥

करिणामलङ्घ्य-गति-वैभवं भजे
करुणाऽवलम्बित-किशोर-विग्रहम् ।
यमिनामनारत-विहारि मानसे
यमुना-वनान्त-रसिकं परं महः ॥

* इस छन्द के प्रत्येक चरण में १३ अक्षर होते हैं । लक्षण—सजसा जगौ च यदि मञ्जुभाषिणी ।

पशुपाल-बालपरिषद्-विभूषणं
शिशुरेष शीतल-विलोल-लोचनः ।
मृदुल-स्मितार्द्र-वदनेन्दु-सम्पदा
मदयन् मदीयहृदयं विगाहते ॥
श्रीकृष्णकर्णामृतम्

———

वसन्ततिलका*

श्रीकृष्णस्तुतिः

बालाय नीलवपुषे नव-किङ्किणीक-
जालाभिराम-जघनाय दिगम्बराय ।
शार्दूल-दिव्य-नख-भूषण-भूषिताय
नन्दात्मजाय नवनीतमुषे नमस्ते ॥

गोधूलि-धूसरित-कोमल-कुन्तलाग्रं
गोवर्धनोद्धरण-केलि-कृत-प्रयासम् ।
गोपीजनस्य कुच-कुङ्कुम-मुद्रिताङ्कं
गोविन्दमिन्दुवदनं शरणं व्रजामः ॥

* इस छन्द के प्रत्येक चरण में १४ अक्षर होते हैं। तथा ८-६ पर विराम होता है। लक्षण—उक्ता वसन्ततिलका तभजा-जगौ गः।

श्रीशिवस्तुतिः

गङ्गा-तरङ्ग-रमणीय-जटा-कलापं
गौरी-निरन्तर-विभूषित-वामभागम् ।
नारायणप्रियमनङ्ग-मदापहारं
वाराणसीपुर-पतिं भज विश्वनाथम् ।।

विश्वनाथाष्टकम्

श्रीशिवस्तुतिः

श्रेयः प्रयच्छतु परं सुविशुद्धवर्णा
पूर्णाभिलाष-विबुधाधिप-वन्दनीया ।
पुण्या कविप्रवरवागिव बालचन्द्र-
चूडामणेश्चरण-रेणु-कणावली वः ।।

स्तुतिकुसुमाञ्जलिः

श्रीदुर्गास्तुतिः

आनन्द-मन्थर-पुरन्दर-मुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु वो विजयाय मञ्जु-
मञ्जीर-सिञ्जित-मनोहरमम्बिकायाः ।

कुवलयानन्दः

श्रीगणेशस्तुतिः

भक्त्या नमत्त्रिदशराज-किरीट-कोटि-
रत्नावली–किरण-राजि–विराजमानम् ।
श्रीमत्करीन्द्रवदनस्य पदारविन्द-
द्वन्द्वं सदा जयति सिद्धिकरं नराणाम् ॥

भैषज्यरत्नावलिः

श्रीशिवस्तुतिः

तस्मै नमः परम-कारण-कारणाय
दीप्तोज्ज्वल-ज्वलित-पिङ्गल–लोचनाय ।
नागेन्द्रहार-कृत-कुण्डल-भूषणाय
ब्रह्मेन्द्र–विष्णु-वरदाय नमः शिवाय ।

शिवाष्टकम्

श्रीकृष्णस्तुतिः

आरक्तदीर्घ-नयनो नयनाभिरामः
कन्दर्प-कोटि-ललितं वपुरादधानः ।
भूयात् स मेऽद्य हृदयाम्बुरुहाधिवर्ती
वृन्दाटवी-नगर-नागर-चक्रवर्ती ॥

पद्यावली

मालिनी*

श्रीकृष्णस्तुतिः

नव-जलधर-वर्णं चम्पकोद्भासि-कर्णं
विकसित-नलिनास्यं विस्फुरन्-मन्द-हास्यम् ।
कनक-रुचि-दुकूलं चारु-बर्हाऽवचूलं
कमपि निखिल-सारं नौमि गोपी-कुमारम् ।।

मुख-जित-शरदिन्दुः केलि-लावण्य-सिन्धुः
कर-विनिहत-कन्दुः वल्लवी-प्राण-बन्धुः ।
वपुरुपसृतरेणुः कक्ष-निक्षिप्त-वेणुः
वचन-वशग-धेनुः पातु मां नन्दसूनुः ।।

मुकुन्दमुक्तावलिः

अखिल-भुवन-सारं प्रेम-सर्वस्व-भारं
नव-मदन-विकारं सौख्य-सिन्धु-प्रचारम् ।

---

* इस छन्द के प्रत्येक चरण में १५ अक्षर होते हैं तथा ८–७ अक्षर पर विराम होता है । लक्षण—ननमयययुतेयं मालिनी भोगिलोकैः ।

मधुर-रस-विहारं राधिका-कण्ठ-हारं
प्रणमत सुकुमारं श्रीयशोदाकुमारम् ॥

सङ्गीतमाधवम्

कनक-रुचि-दुकूलश् चारु-बर्हाऽवचूलः
सकल-निगम-सारः कोऽपि लीलाऽवतारः ।
त्रिभुवन-सुखकारी शैलधारी मुरारिः
परिकलित-रथाङ्गो मङ्गलं नस्तनोतु ॥

सजल-जलद-कालं प्रेम-वापी-मरालम्
अभिनव—वनमालं क्षेम-वल्ली-प्रवालम् ।
भुवन-नलिन-नालं दानवानां करालं
निखिल–मनुज-पालं नौमि तं नन्दबालम् ।

उद्भटसागरः

श्रीशिवस्तुतिः

शिशिर-किरण-धारी शैलबाला-विहारी
भव-जलनिधि-तारी योगि-हृत्पद्म-चारी ।

शमनज-भय-हारी प्रेतभूमि-प्रचारी
कृपयतु मयि देवः कोऽपि संहारकारी ॥

उद्भटसागरः

श्रीदुर्गास्तुतिः

शरणमपि सुराणां सिद्ध-विद्याधराणां
मुनि-दनुज-नराणां व्याधिभिः पीडितानाम् ।
नृपति-गृह-गतानां दस्युभिर्वा वृतानाम्
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥

———

पञ्चचामरम्*

जटा-कटाह-सम्भ्रम-भ्रमन्निलिम्प-निर्झरी-
विलोल-वीचि-वल्लरी-विराजमान-मूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाट-पट्ट-पावके
किशोर-चन्द्रशेखरे रतिः प्रतिक्षणं मम ॥

श्रीशिवस्तुतिः

धराधरेन्द्र-नन्दिनी-विलासबन्धु-बन्धुर-
स्फुरद्दिगन्त-सन्तति-प्रमोदमान-मानसे ।
कृपाकटाक्ष-धोरणी-निरुद्ध-दुर्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥

शिवताण्डवस्तोत्रम्

श्रीकालिन्दीस्तुतिः

मुरारि-काय-कालिमा-ललाम-वारि-धारिणी
तृणीकृत-त्रिविष्टपा त्रिलोक-शोक-हारिणी ।
मनोनुकूल-कूल- कुञ्ज - पुञ्ज - धूत - दुर्मदा
धुनोतु मे मनोमलं कलिन्दनन्दिनी सदा ॥

यमुनाष्टकम्

---

* इस छन्द के प्रत्येक चरण में १६ अक्षर होते हैं तथा ८-८ अक्षर पर विराम होता है। लक्षण—जरौ जरौ ततो जगौ च पञ्चचामरं वदेत्।

श्रीकृष्णस्तुतिः

भजे व्रजैक-मण्डनं समस्त-पाप-खण्डनं
स्व-भक्त-चित्त-रञ्जनं सदैव नन्दनन्दनम् ।
सुपिच्छ-गुच्छ-मालकं सुनाद-वेणु-हस्तकम्
अनङ्ग-रङ्ग-सागरं नमामि कृष्ण-नागरम् ॥

मनोज - गर्व - मोचनं विशाल - लोल - लोचनं
विधूत-गोप-शोचनं नमामि पद्मलोचनम् ।
करारविन्द—भूधरं स्मिताऽवलोक—सुन्दरं
महेन्द्र-मान-दारणं नमामि कृष्ण-वारणम् ॥

श्रीकृष्णाष्टकम्

मन्दाक्रान्ता*

श्रीकृष्णस्तुतिः

वृन्दारण्ये तपन-तनया-तीर-वानीर-कुञ्जे
गुञ्जन्मञ्जु-भ्रमर-पटली-काकली-केलि-भाजि ।
आभीराणां मधुर-मुरली-नाद-सम्मोहितानां
मध्ये कोऽप्यवतु सततं नन्दगोपालबालः ॥

मुग्धं स्निग्धं मधुर-मुरली-माधुरी-धीरनादैः
कारं कारं करणविवशं गोकुल-व्याकुलत्वम् ।
श्यामं कामं युवजन-मनो-मोहनं मोहनाङ्गं
चित्ते नित्यं निवसतु महो वल्लवी-वल्लभं नः ॥

श्रीकृष्णकर्णामृतम्

---

* इस छन्द के प्रत्येक चरण में १७ अक्षर होते हैं तथा ४-६-७ अक्षर पर विराम होता है। लक्षण--मन्दाक्रान्ताऽम्बुधि-रस-नगै र्मो भनौ तौ गयुग्मम् ।

———

पृथ्वी*

श्रीकृष्णस्तुतिः

जयत्यमल-कौस्तुभ-द्युति-विराजितोरःस्थलः
 सहेल-हत-दानवो नव-तमाल-नील-द्युतिः।
विनम्र-सुर-मस्तक-च्युत-विकासि-पुष्पावली-
 विकीर्ण-मधु-सीकर-स्नपित-पादपीठो हरिः॥

स्तुतिकुसुमाञ्जलिः

स्मृतापि तरुणातपं करुणया हरन्ती नृणाम्
 अभङ्गुर-तनुत्विषां वलयिता शतैर्विद्युताम्।
कलिन्द-गिरि-नन्दिनी तट-सुर-द्रुमालम्बिनी
 मदीय-मति-चुम्बिनी भवतु कापि कादम्बिनी॥

विशाल-विषयाटवी-वलय-लग्न-दावानल-
 प्रसृत्वर-शिखावली-विकलितं मदीयं मनः।
अमन्द-मिलदिन्दिरे निखिल-माधुरी-मन्दिरे
 मुकुन्द-मुख-चन्दिरे चिरमिदं चकोरायताम्॥

भामिनीविलासम्

---

* इस छन्द के प्रत्येक चरण में १७ अक्षर होते हैं तथा ८-९ पर विराम होता है। लक्षण—जसौ जसयला वसुग्रहयतिश्च पृथ्वी भवेत्।

स्वहस्त-गिरिधारिणः प्रचुर-वर्षणावारिणो
महेन्द्र-मद-हारिणो व्रज-वसुन्धरा-धारिणः।
गवादि-सुख-कारिणः स्वजन-शोक-सन्तारिणः
सुरारि-कुल-मारिणश्चरणपङ्कजं चिन्तये ॥

नवीन-जलदाकृतिः सुख-समूह-सेवाकृतिः
समस्त-मणि-भूषितः सुरभि-चन्दनारूषितः।
स्फुरन्मुरलिकाऽधरः स्वजन-मोहनैकाऽधरः
सदा मदन-सुन्दरो व्रजपुरन्दरः स्मर्यताम् ॥

श्रीशिवस्तुतिः

जयत्यमर-दीर्घिका-सलिल-सेक-सम्वर्धित-
प्रचण्ड-नयनानल-ग्लपित-तीव्र-ताप-व्यथः।
अचिन्त्य-चरितोज्ज्वल-ज्वलदनन्य-साधारण-
प्रभाव-महिमाहित-त्रिभुवनोपकारो हरः ॥

स्तुतिकुसुमाञ्जलिः

श्रीसरस्वतीस्तुतिः

करङ्गमित-पुस्तकी मधुर-वल्लकी-संगमा
दृशा जित-कुरङ्गमा कलितजङ्गमाजङ्गमा।

अधिष्ठित–विहङ्गमा सकलशास्त्र–पारङ्गमा
सदाऽस्तु हृदयङ्गमा वदन-पङ्कजे वाङ् मम ॥
अश्वशास्त्रम्

शिखरिणी *

श्रीकृष्णस्तुतिः

अपारे संसारे विषम–विषयारण्य–सरणौ
मम भ्रामं भ्रामं विगलित–विरामं जडमतेः ।
परिश्रान्तस्यायं तरणि–तनया–तीर–निलयः
समन्तात् सन्तापं हरि - नव - तमालस्तिरयतु ॥
भामिनीविलासम्

श्रीसरस्वतीस्तुतिः

मधुस्यन्दी मन्दीकृत–त्रिपदुपाधिर्भवमरु-
भ्रमक्लेशावेश–प्रशम–कमनीयो विजयते ।
अखण्ड-श्रीखण्ड-द्रव-नव-सुधासार-सरसः
प्रसादो वाग्देव्याः प्रवरकवि-काव्यामृतवपुः ॥
स्तुतिकुसुमाञ्जलिः

---

* इस छन्द के प्रत्येक चरण में १७ अक्षर होते हैं तथा ६-११ पर विराम होता है । लक्षण—रसै रुद्रैश्छिन्ना य म न स भ ला गः शिखरिणी ।

श्रीगौरीस्तुतिः

वहन्ती सिन्दूरं प्रबल-कवरी-भार-तिमिर-
त्विषां वृन्दैर्वन्दीकृतमिव नवीनार्क-किरणम् ।
तनोतु क्षेमं नस्तव वदन-सौन्दर्य-लहरी-
परीवाह-स्रोतः-सरणिरिव सीमन्त-सरणिः ॥
सौन्दर्यलहरी

मुखे ते ताम्बूलं नयन-युगले कज्जल-कला
ललाटे कश्मीरं विलसति गले मौक्तिकलता ।
स्फुरत्काञ्ची शाटी पृथु-कटि-तटे हाटकमयी
नमामि त्वां गौरीं नगपति-किशोरीमविरतम् ॥
सौन्दर्यलहरी

श्रीजगन्नाथस्तुतिः

कदाचित् कालिन्दी-तट-विपिन-संगीत-तरलो
मुदाभीरी-नारी-वदन-कमलाऽऽस्वाद-मधुपः ।
रमा-शम्भु-ब्रह्माऽमरपति-गणेशार्चित-पदो
जगन्नाथस्वामी नयन-पथ-गामी भवतु मे ॥
जगन्नाथाष्टकम्

श्रीलक्ष्मीस्तुतिः

समीपे सङ्गीत-स्वर-मधुर-भङ्गी मृगदृशां
विदूरे दानान्ध-द्विरद-कलभोद्दाम-निनदः ।

बहिर्द्वारे तेषां भवति हय-हेषा-कलकलो
 दृगेषा ते येषामुपरि कमले ! देवि सदया ।।

लक्ष्मीलहरी

श्रीगङ्गास्तुतिः

निधानं धर्माणां किमपि च विधानं नवमुदां
 प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
 श्रियामाधानं नः परिहरतु तापं तव वपुः ।।

गङ्गालहरी

कोकिलकम्*

वेदस्तुतिः

जय जय जह्यजामजित दोष-गृभीत-गुणां
 त्वमसि यदात्मना समवरुद्ध—समस्त-भगः ।
अग-जगदोकसामखिल-शक्त्यवबोधक ते
 क्वचिदजयाऽत्मना च चरतोऽनुचरेन्निगमः ।।

* इस छन्द के प्रत्येक चरण में १८ अक्षर होते हैं तथा ८-१० पर विराम होता है । लक्षण—यदि भवतो नजौ भजजला गुरु कोकिलकम् ।

शार्दूलविक्रीडितम् *

श्रीकृष्णस्तुतिः

सान्द्रानन्द—पुरन्दरादि—दिविषद्—

वृन्दैरमन्दादरा—

दानम्रैर्मुकुटेन्द्र—नीलमणिभिः

सन्दर्शितेन्दीवरम् ।

स्वच्छन्दं मकरन्द—सुन्दर गलन्-

मन्दाकिनी-मेदुरम्

श्रीगोविन्द-पदारविन्दमशुभ-

स्यन्दाय वन्दामहे ॥

गीतगोविन्दम्

केली—लोलमुदारनाद—मुरली—

नाली-विलीनाधरम्

धूली-धूमल—कान्ति—कुन्तल—भर—

व्यासङ्गि—पिञ्छाञ्चलम् ।

---

* इस छन्द के प्रत्येक चरण में १९ अक्षर होते है तथा १२-७ पर विराम होता है । लक्षण—सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।

नालीकायत—लोचनं नव—घन—
श्यामं क्वणन्किङ्किणी
पाली—दन्तुर—पिङ्गलाम्बर—धरं—
गोपालबालं भजे ॥

कृष्णाष्टकम्

यत्रास्ते मधुपच्छलेन मनसः
श्रेणी व्रजैणीदृशाम्
स्वच्छन्दं वनमालया परिचिता
पादारविन्दावधि ।
विद्युद्दाम–समाहृताञ्जन–घन–
श्यामाऽभिरामद्युतिर्
मूर्तिः कापि कलापिनी स्फुरतु वः
स्वान्ते नितान्तोज्ज्वला ॥

श्रीगोविन्दरतिमंजरी

विस्फारा गिरिगोधने दधिपयः—
स्तेये रहोप्यस्थिरा
नन्दे सन्नमिताधरा व्रजवधू–
श्रेण्यानने मन्थराः ।

क्रूराः केशिनि मेदुराः सहचर-
व्यूहेऽधिगोष्ठान्तरं
गोविन्दस्य दिशन्तु वः शमतुलं
नानाविधा दृष्टयः ॥
श्रीकृष्णविरुदावली

श्रीशिवस्तुतिः

तारानायक—शेखराय जगदा—
धाराय धाराधर—
च्छायाधारक—कन्धराय गिरिजा
सङ्गैकशृङ्गारिणे ।
नद्या शेखरिणे दृशा तिलकिने
नारायणेनास्त्रिणे
नागैः कङ्कणिने नगेन गृहिणे
नाथाय नित्यं नतिः ॥
रसगङ्गाधरः

श्रीरामस्तुतिः

उत्फुल्लाऽमल—कोमलोत्पल—दल—
श्यामाय रामाय ते

कामाय प्रमदामनोहर—गुण—

ग्रामाय रामात्मने ।

योगारूढ—मुनीन्द्र—मानस—सरो—

हंसाय संसार—वि—

ध्वंसाय स्फुरदोजसे रघुकुलो—

त्तंसाय पुंसे नमः ॥

श्रीरामस्तवराजस्तोत्रम्

द्वाः सर्वार्थ-समागमस्य रसना-

रङ्गस्थली-नर्तकी

तत्त्वालोकन-कज्जलध्वज-शिखा

वैदग्ध्य-विश्रामभूः ।

शृङ्गारादिरस-प्रसार-लहरी

स्वर्लोक-कल्लोलिनी

कल्पान्त-स्थिर-कीर्ति-सम्भ्रम-सखी

सा भारती पातु वः ॥

कीर्तिलता

———

स्रग्धरा*

एकैश्वर्ये स्थितोऽपि प्रणत—बहुफले
य: स्वयं कृत्तिवासा:
कान्ता-संमिश्र-देहोऽप्यविषयमनसां
य: पुरस्ताद् यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्
बिभ्रतो नाभिमान:
सन्मार्गालोकनाय व्यपनयतु स
वस्तामसीं वृत्तिमीश: ॥
मालविकाग्निमित्रम्

श्रीसूर्यस्तुति:

प्रालेयानां कराला: कवलित-जगती
मण्डल-ध्वान्तजाला:
त्रात—स्वर्लोकपाला विदलदरुणिम—
क्षिप्त-बाल-प्रवाला: ।

---

* इस छन्द के प्रत्येक चरण में २१ अक्षर होते हैं तथा ७-७-७ पर विराम होता है। लक्षण—म्रभ्नैर्यानां त्रयेण त्रिमुनि-यतियुता स्रग्धरा कीर्तितेयम् ।

विश्लिष्यत्–कोकवाला–ज्वर—हरण—भवत्—
कोतिजालैर्जटाला
व्योम—व्याप्तौ विशालास्त्वयि दधतु शिवं
भास्वतो भानुषालाः ॥
सुधालहरी

———

कुसुममञ्जरी *

श्रीकृष्णस्तुतिः

केशपाश–धृत–पिञ्छिका–वितति–
सञ्चलन्मकर–कुण्डलम्
हार–जाल–वनमालिका–ललित–
मङ्गराग–घन–सौरभम् ।
पीत–चेल–धृत–काञ्चिकाञ्चित–
मुदञ्चदंशु–मणि–नूपुरम्
रासकेलि–परिभूषितं तव हि
रूपमीश ! कलयामहे ॥

* इस छन्द के प्रत्येक चरण में २१ अक्षर होते हैं ।

वेणु-नाद-कृत-तान-दान-कलगान-
राग-गति-योजना-
लोभनीय-मृदु-पाद-पात-कृत-
ताल-मेलन-मनोहरम् ।

पाणि-संक्वणित-कङ्कणं च मुहु-
रश-लम्बित-कराम्बुजम् ।
श्रोणि-बिम्ब-चलदम्बरं भजत
रासकेलि-रस-डम्बरम् ।।

नारायणीयम्

अश्वधाटी*

श्रीदुर्गास्तुतिः

वालीयुत-श्रवणपाली-युगा
ललित-चूली-विराजि-त्रकुला
केलीगताऽनुग-मराली—कुला
मधुरमालीभिराहृत-कथा ।

---

* इस छन्द के प्रत्येक चरण में २२ अक्षर होते हैं। लक्षण-शोभानि धानमिह छन्दोऽश्वधाटि खलु तो भौ जजौ स र न गाः।

नालीक—दृक्—कुसुम-नालीक-
पाणिरिह कालीयशासिसहजा
तालीदलाभ-तनुमाली सदा
भवतु काली शुभाय मम सा ॥

अश्वघाटीकाव्यम्

चेटीभवन्निखिल-खेटी
कदम्बतरु-वाटीसु नाकि-पटली-
कोटीर-चारुतर-कोटी-मणी-
किरण-कोटी-करम्बित-पदा ।
पाटीर-गन्ध-कुच-शाटी—
कवित्व-परिपाटीमगाधिप-सुता
घोटीकुलादधिकधाटी-
मुदारमुख—वीटी—रसेन तनुताम् ॥

अम्बाष्टकम्

श्रीनटराजस्तुतिः

सदञ्चितमुदञ्चित-निकुञ्चित-पदाऽ-
र्पित-झणंझणित-मञ्जु-कटकम्

पतञ्जलि-दृगञ्जनमचञ्चल-पदं
जनन-भञ्जनकरं गलरवम् ।
कदम्बरुचिमम्बरवसं परममम्बुद—
कदम्बक-विडम्बन-करम्
चिदम्बुधि-मणिं बुध-हृदम्बुज-रविम्
वर-चिदम्बरनटं हृदि भजे ॥

हरिं त्रिपुरभञ्जननन्त-कृत-कङ्कण-
मखण्ड-दयमन्त-रहितम्
विरिञ्चि-सुर-संहति-पुरन्दर-विचिन्तित-
पदं तरुण-चन्द्र-मुकुटम् ।
परम्परमखण्डितयमं भसित-मण्डित-
तनुं मदन-भञ्जन-करम्
चिरन्तनमिमं प्रणत-सञ्चित-निधिं
वर-चिदम्बरनटं हृदि भजे ॥

चिदम्बरस्तोत्रम्

परिशिष्टम्

भुजङ्गप्रयातम्

ब्रह्मस्तुतिः

नमस्ते सते सर्वलोकाश्रयाय
नमस्ते चिते विश्वरूपात्मकाय ।
नमोऽद्वैततत्त्वाय मुक्तिप्रदाय
नमो ब्रह्मणे व्यापिने निर्गुणाय ॥

त्वमेकं शरण्यं त्वमेकं वरेण्यं
त्वमेकं जगत्कारणं विश्वरूपम् ।
त्वमेकं जगत्कर्तृ-पातृ-प्रहर्तृ
त्वमेकं परं निश्चलं निर्विकल्पम् ॥

भयानां भयं भीषणं भीषणानां
गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैः पदानां नियन्तृ त्वमेकं
परेषां परं रक्षकं रक्षकाणाम् ॥

तदेकं स्मरामस्तदेकं भजाम-
स्तदेकं जगत्साक्षिरूपं नमामः ।
तदेकं निधानं निरालम्बमीशं
भवाम्भोधि-पोतं शरण्यं व्रजामः ॥

महानिर्वाणतन्त्रम्